O. P. JINDAL SCHOOL, SAVITRI NAGAR

SAMPLE QUESTION PAPER

Annual Examination (2022 – 2023)

Class / Section: VI **MM: 80**

Subject: Sanskrit **Time: 3.00Hrs**

Name: _____ Roll No.:_____

(Fifteen Minutes Extra will be given for reading the Question Paper.)

General Instructions: ***All questions are compulsory***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

खण्ड क	पठित अवबोधनम्	(10 अङ्काः)
खण्ड ख	रचनात्मकं कार्यम्	(15 अङ्काः)
खण्ड ग	अनुप्रयुक्त व्याकरणम्	(25 अङ्काः)
खण्ड घ	पठित–अवबोधनम्	(30 अङ्काः)

2) सर्वे प्रश्नाः अनिवार्याः।

3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

4) प्रश्न संख्या अवश्यं लेखनीया।

5) उत्तराणि संस्कृतेन एव लेखनीयानि।

(खण्ड–क) पठित अवबोधनम्

प्र0 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–

यदा रात्रिः गच्छति तदा सूर्यः आगच्छति। अन्धकारः प्रणश्यति प्रातः कालः च भवति। इयं मधुरावेला भवति। चन्द्रः अस्ताचलम् गच्छति। तारकाः च निस्तेजा भवन्ति। प्रातःकाले जनाः सूर्यम् नमन्ति ईशम् च भजन्ति। प्रातःकाले खगाः कूजन्ति, जनाः स्वकार्याणि कुर्वन्ति। छात्राः स्वपाठान् कण्ठस्थी कुर्वन्ति। कृषकाः क्षेत्रेषु कृषिकार्यम् कुर्वन्ति।छात्राः अध्यापकाः तु विद्यालयम् प्रति गच्छन्ति। केचन जनाः भ्रमणाय उद्यानम् प्रति गच्छन्ति। तत्र जनाः भ्रमन्ति व्यायामम् च कुर्वन्ति। प्रसन्नाः बालाः अपि इतः ततः गच्छन्ति। वानराः वृक्षेषु कूर्दन्ति। सर्वत्र कोलाहलः भवति। परन्तु ये अलसाः सन्ति ते गृहे एव सुप्ताः भवन्ति।

I एकपदेन उत्तरत– **(½x4=2)**

i यदा रात्रि गच्छति तदा कः आगच्छति ?

ii चन्द्रः कुत्र गच्छति ?

iii प्रातःकाले के कूजन्ति ?

iv जनाः कुत्र भ्रमन्ति ?

II पूर्णवाक्येन उत्तरत– **(1x2=2)**

i उद्यानेजनाः किम्–किम् कुर्वन्ति ?

ii प्रातःकालेछात्राः किम् कुर्वन्ति ?

III **निर्देशानुसारम् उत्तरत– (निर्देशानुसार उत्तर दीजिए)–** **(1X4=4)**

i 'कूर्दन्ति' इति पदे कः धातुः अस्ति ?

(क) कृ (ख) कुर्

(ग) कुर्द (घ) कूर्द्

ii 'उद्याने' इति पदे का विभक्ति अस्ति ?

(क) पंचमी (ख) षष्ठी

(ग) सप्तमी (घ) चतुर्थी

iii 'कपिः' इति पदस्य कः पर्यायः गद्यांशे लिखितः अस्ति ?

(क) वानरः (ख) प्लवंग

(ग) हरिः (घ) न कः अपि

iv 'भवन्ति' इति क्रिया पदस्य कर्तृपदम् किम् अस्ति ?

(क) गृहे (ख) कोलाहलः

(ग) सर्वत्र (घ) अलसाः

IV **गद्यांशस्य समुचितं शीर्षकं लिखत–** (अनुच्छेद का उचित शीर्षक लिखिए।) **(2X1=2)**

(खण्ड–ख) रचनात्मकंकार्यम्

प्र02 **मंजूषायाम् प्रदत्त शब्दानाम् सहायतया चित्रं दृष्ट्वा पंचवाक्यानि संस्कृतेन लिखत–** **(1X5=5)**

वनस्य, व्याधः अनेके, वृक्षाः, अपि, मृगः, धावति, गजः, शशकौ, धावतः



प्र0 3 **संस्कृत वाक्यानाम् हिन्दीभाषायाम् अनुवादम् कुरुत–** **(1x5=5)**

i सुप्रिया प्रातः पाठशालाम् गच्छति।

ii बालिकाः अपि खेलिष्यन्ति।

iii सुखम् दूरे हि तिष्ठति।

iv मातुलः! किरसि कथं न स्नेहम् ?

v युष्माकं दुःखस्य कारणम् किम् ?

प्र0 4 अधोलिखितम् वार्तालापम् मंजूषायाः सहायतया पूरयत– **(½x10=5)**

नीचे लिखे वार्तालाप को मंजूषा की सहायता से पूरा कीजिए–

जया यदा अहम् तव चित्रम् ———तदा हसामि।

हिमानी त्वम् मम चित्रे हसनस्य किम् कारणम्——— ?

जया अस्मिन् ——— त्वम् पतसि सर्वे च हसन्ति।

हिमानी अन्यम् चित्रम् पश्य ! अस्मिन् चित्रे एषः ———अस्ति।

जया एषः मम सहोदरः ————।

हिमानी ———सह कः तिष्ठति ?

जया तेन सह मम जनकः ———।

हिमानी एषा सुन्दरी कन्या———अस्ति।

जया एषा तु मम ———अस्ति।

हिमानी ——— तव अम्बायाः चित्रम् अत्र न अस्ति।

जया मम अम्बातु स्व दूरभाषयंत्रेण चित्रम् कर्षति।

पश्यसि, अस्ति, पश्यामि, तेन, तिष्ठति, का, कः, चित्रे, किम्, भगिनी

(खण्ड–ग) अनुप्रयुक्तव्याकरणम्

प्र0 5 उचित रूपाणि चित्वा रिक्तस्थानानि पूरयत– (अशुद्धि शोधन) **(1x5=5)**

i ———कन्दुकेन क्रीडन्ति।

(क) बालः (ख) बाले

(ग) बालाः (घ) बालौ

ii तत्र ———महिलाः तिष्ठन्ति।

(क) त्रीणि (ख) त्रयः

(ग) तिस्रः (घ) त्रि

iii अहम् संस्कृतम् ———।

(क) पठामि (ख) पठसि

(ग) पठति (घ) पठतः

iv ————————सूर्योदयः भवति।

(क) आकाशेन (ख) आकाशात्

(ग) आकाशस्य (घ) आकाशे

v ————————आम्रे पततः।

(क) एतत् (ख) एते

(ग) एतानि (घ) एतस्य

प्र0 6 उचितम् विकल्पम् चित्वा रिक्तस्थानानि पूरयत– (वाक्य रचना) **(1X4=4)**

i वयंपाठम्———।

(क) स्मरथः (ख) स्मरन्ति

(ग) स्मरामि (घ) स्मरामः

ii वृक्षाः छायाम् ————।

(क) यच्छति (ख) यच्छतः

(ग) यच्छन्ति (घ) यच्छसि

iii गङ्गा हिमालयात् ————।

(क) निस्सरतः (ख) निस्सरन्ति

(ग) निस्सरति (घ) निस्सरसि

iv मूषकाः इतः ततः ————।

(क) कूर्दति (ख) कूर्दामि

(ग) कूर्दतः (घ) कूर्दन्ति

प्र0 7 मंजूषातः उपयुक्तानाम् अव्यय पदानाम् प्रयोगेण रिक्तस्थानानि पूरयत– **(1X4=4)**

i ————————देशः तथावेषः।

ii माता–पिता———शिशून् पालयतः।

iii गंगा नदी ————प्रवहति ?

iv महात्मागांधीसत्यम् ———अत्यजत्।

कुतः, यथा, न, च,

प्र0 8 कोष्ठकात् उचितम् संख्यापदं चित्वा लिखत– **(1X4=4)**

i वने———गजौ स्तः। (द्वे / द्वौ)

ii गृहे–––––––आभूषणानि सन्ति। (त्रीणि / तिस्रः)

iii ––––––महिलाः जलम् आनयन्ति। (चत्वारि / चतस्रः)

iv रात्रौ आकाशे––––––चन्द्र अस्ति (एकः / एकम्)

प्र0 9 शुद्ध कथनानाम् समक्षम् *'आम्'* अशुद्ध कथनानाम् समक्षम् *'न'* लिखत– (1X4=4)

i श्रमेण धरित्री सरसा भवति। (आम्/ न)

ii बालकः स्वं न अगणयत्। (आम्/ न)

iii दश बालकाः स्नानाय अगच्छन्। (आम्/ न)

iv एकः बालकः नद्याम् मग्नः। (आम्/ न)

प्र0 10 अधोलिखित पर्यायायौ द्वौ–द्वौ पर्यायपदौ लिखत – (1X4=4)

i	समुद्र	––––––––––	–––––––––––
ii	उद्यानम्	––––––––––	–––––––––––
iii	पक्षी	––––––––––	–––––––––––
iv	चन्द्रमा	––––––––––	–––––––––––

(खण्ड–घ)पठितअवबोधनम्

प्र0 11 अधोलिखितम् अनुच्छेदम् पठित्वा तद् आधारितानां प्रश्नानाम् उत्तराणि लिखत–

एकस्मिन् वने श्रृगालः बकः च निवसतः स्म। तयोः मित्रता आसीत्। एकदा प्रातः श्रृगालः बकम् अवदत् – ''मित्र ! श्वः त्वंमयासहभोजनंकुरु।'' श्रृगालस्य निमंत्रणेन बकः प्रसन्नः अभवत्। अग्रिमे दिने सः भोजनाय श्रृगालस्य निवासम् आगच्छत्।

I एकपदेन उत्तरत– (1X2=2)

i बकस्य मित्रं कः आसीत् ?

ii कः प्रसन्नः अभवत् ?

II पूर्णवाक्येन उत्तरत– (2X1=2)

i प्रातः श्रृगालः बकंकिंअवदत् ?

III निर्देशानुसारं उत्तरत– (1X2=2)

i 'निवसतः' इति पदस्य कः अर्थः ?

क) रहती है **ख)** रही हो **ग)** दोनो निवास करते हैं

ii अनुच्छेदात् द्वौ अव्ययौ पदं चिनुत–

प्र0 12 अधोलिखितम् श्लोकम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–

तयोः श्रमेण क्षेत्राणि सस्य पूर्णानि सर्वदा।

धरित्री सरसा जाता या शुष्का कण्टकावृता।।

I एकपदेनउत्तरत– (1X2=2)

i श्रमेण का सरसा भवति ?

ii क्षेत्राणि कानि पूर्णानि सन्ति ?

II पूर्णवाक्येन उत्तरत– **(2x1=2)**

i धरित्री कीदृशी आसीत् ?

III उचितम् उत्तरम् चित्वा लिखत– **(1x2=2)**

i 'सरसा' इति विशेषण पदस्य विलोमपदम् किम् ?

(अ) श्रमेण (ब) नीरसा

(स) जाता (द) सर्वदा

ii 'धरित्री' इति पदस्य पर्याय पदम् श्लोके किम् प्रयुक्तम् ?

(अ) पृथ्वी (ब) तयोः

(स) शुष्का (द) कण्टका

प्र0 13 अधोलिखितम् नाट्यांशम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–

(एकदादशबालकाः स्नानाय नदीम् अगच्छन्)

नायकः अपि सर्वेबालकाः नदीम् उत्तीर्णाः ?

प्रथमः (गणयित्वा) नव एव सन्ति।

अपरः दशमः नद्यां मग्नः इति।

पथिकः बालकाः! युष्माकम् दुखस्य कारणम् किम् ?

नायकः वयम् दश बालकाः स्नातुम् आगताः। इदानीम् नव एव स्मः। एकः नद्यांमग्नः इति।

पथिकः त्वम् बालकान् गणय।

नायकः (गणयित्वा) नव एव आसन्।

पथिकः दशमः त्वम् असि इति।

I एकपदेन उत्तरत– **(1x2=2)**

i कति बालकाः स्नानाय आगच्छन् ?

ii 'दशमः त्वम् असि' इति कः अवदत् ?

II पूर्णवाक्येन उत्तरत– **(2x1=2)**

i बालकानाम् दुखस्य कारणम् किम् ?

III उचितम् उत्तरम् चित्वा लिखत– **(1X2=2)**

i 'स्नानाय' इति पदे का विभक्ति ?

(अ) तृतीया (ब) चतुर्थी

(स) पंचमी (द) षष्ठी

ii 'एव' इति अव्यय पदस्य कः अर्थः ?

(अ) और (ब) भी

(स) ही (द) तो

प्र0 14 अधोलिखित प्रश्नेषु श्लोकांशान् मेलयत– **(1X4=4)**

i	गृहंजीर्णम् न वर्षासु	तौ तु क्षेत्राणि कर्षतः ।
ii	हलेन च कुदालेन	या शुष्का कण्टकावृता।
iii	पादयोर्न पदत्राणे	वृष्टि वारयितुम् क्षमम्।
iv	धरित्री सरसा जाता	शरीरे वसनानि नो।

प्र0 15 निर्देशानुसारम् वचन परिवर्तनम् कुरुत– **(1X4=4)**

i	तव गृहम्।	(द्विवचने)
ii	अस्माकम् पुस्तकानि।	(एकवचने)
iii	अहम् नृत्यामि।	(बहुवचने)
iv	त्वम् पठसि।	(बहुवचने)

प्र0 16 निम्नलिखितेषु तत्सम शब्देषु तद्भव शब्दान् लिखत– **(1X4=4)**

निम्नलिखित तत्सम शब्दों से तद्भव शब्द बनाइए–

तारकः, मयूरः, कोकिलः, कपोतः

———00———